किं दृक् कर्म्म तथोदयास्तसमये द्वेधा विदध्युर्बुधाः
सर्व्वं मे विमलं वदामलमलं गोलं विजानासि चेत् ॥'
अथ त्रिप्रश्नोदितदिनमानभेदप्रश्नं श्लोकद्वयेनाह।
'महदहः किमहो रजनी तनु-
र्दिनमणौ गणकोत्तरगोलगे।
ननु तनुर्दिवसो महती निशा
वद विचक्षण ! दक्षिणदिग्गते ॥
भवति किं द्युनिशं द्युनिवासिनां
द्युमणिवर्षमितञ्च सुरद्विषाम्।
पितृषु किं शशिमासमितं तथा
युगसहस्रयुगं द्रुहिणस्य किम् ॥'
अथ राश्युदयमानकालभेदप्रश्नञ्चाह।
'भवलयस्य किलार्कलवाः समाः
किमसमैः समयैः खलु राशयः।
समुपयान्त्युदयं किमु गोलवि-
न्नविषयेष्वखिलेष्वपि ते समाः ॥'
अथ द्युज्याकुज्यादिसंस्थानप्रश्नं वृत्तार्द्धेनाह।
'द्युज्याकुज्यापमसमनराशाग्रलम्बादिकानां
विद्वन् ! गोले वियति हि यथा दर्शय क्षेत्रसंस्थाम् ॥'
अथ चन्द्रार्कग्रहणयोः दिक्कालभेदाद्युपपत्तिप्रश्नान् श्लोकोत्तरार्द्धेनाह।
'तिथ्यन्ते चेत् ग्रह उडुपतेः किन्न भानोस्तदानीं
इन्दोः प्राच्यां भवति हि रवेः प्रग्रहः किं प्रतीच्याम् ॥'
लम्बनं वद किं नावनतिमतिमतां वर !।
तत्संस्मृतिस्तिथौ बाणे किं ते सिद्धे कुतः कुतः ॥'
अथ शृङ्गोन्नतौ चन्द्रस्य शुक्लस्य क्षयवृद्धिप्रश्नमाह।
'शुक्लस्य दिनराज एष महसो दाता कुतस्तः कुतः
संपूर्णत्वमतोऽप्यहो क्षमवशाद्दोषातिसङ्गादिव।
संप्राप्याथ पुनः क्षयीतनुमतस्तस्याश्रये नैव किं
शुक्लस्य क्रमशस्तथैव महसो वृद्धिर्गतिः सद्वृत्तताम् ॥'
अथ प्रथमप्रश्नस्य पृथिवीसंस्थानोपपत्तेरुत्तरं विवक्षुरादिसर्गे पृथिव्यादीनां तत्त्वानामादितत्त्वं निखिलजगज्जननैकबीजं परं ब्रह्म मनसा प्रणिपत्यादौ तावत् तज्जन्ममाह।
'यस्मात् क्षुब्धप्रकृतिपुरुषाभ्यां महानस्य गर्भेऽहङ्कारोऽभूत् खमखिलजलोर्व्यस्ततः संहतेश्च।
ब्रह्माण्डं यज्जठरगमहीपृष्ठनिष्ठो विरिञ्चिर्विश्वं शश्वत् सृजति परमं ब्रह्म तत्तत्त्वमाद्यम् ॥'
अथ भूमेः स्वरूपमाह।
भूमेः पिण्डः शशाङ्कज्ञकविरविकुजेज्यार्किनक्षत्रकक्षा
वृत्तैर्वृत्तो वृतःसन् मृदनिलसलिलव्योमतेजोमयोऽयम्।
नान्याधारः स्वशक्त्या वियति च नियतं तिष्ठतीहास्य पृष्ठे
निष्ठं विश्वञ्च शश्वत् सदनुजमनुजादित्यदैत्यं समन्तात् ॥
सर्व्वतः पर्व्वतारामग्रामचैत्यद्रुमैश्चितः।
कदम्बकुसुमग्रन्थिः केशरप्रकरैरिव ॥'
अथ पुराणेषु भूमेराधारपरम्परा या पठिता तां निराकुर्वन्नाह।
मूर्त्तो धर्त्ता चेद्धरित्र्यास्तदन्य-
स्तस्याप्यन्योऽप्येवमत्रानवस्था।
अन्त्ये कल्प्या चेत् स्वशक्तिः किमाद्ये
किं नो भूमिः साष्टमूर्त्तेश्च मूर्त्तिः ॥'
अथ कथमियं भूमेः स्वशक्तिरित्याशङ्कां परिहरन्नाह।
'यथोष्णतार्कानलयोश्च शीतता
विधौ द्रुतिः के कठिनत्वमश्मनि।
मरुच्चलो भूरचला स्वभावतो
यतो विचित्राः खलु वस्तुशक्तयः ॥
आकृष्टशक्तिश्च मही तया यत्
खस्थं गुरु स्वाभिमुखं स्वशक्त्या।
आकृष्यते तत् पततीव भाति
समे समन्तात् क्व पतत्वियं खे ॥'
अथ बौद्धानां युक्तिमाह।
'भपञ्जरस्य भ्रमणावलोका-
दाधारशून्या कुरिति प्रतीतिः।
खस्थं न दृष्टं गुरु च क्षमातः
खेऽधः प्रयातीति वदन्ति बौद्धाः ॥
द्वौ द्वौ रवीन्दू भगणौ च तद्व-
देकान्तरौ तावुदयं व्रजेताम्।
यदब्रुवन्नेवमनर्थवादान्
ब्रवीम्यतस्तान् प्रति युक्तियुक्तम् ॥'
अथ तेषां युक्तिभङ्गमाह।
'भूः खेऽधः खलु यातीति बुद्धिर्बौद्ध ! मुधा कथम्।
याता यातश्च दृष्ट्वापि खे यत् क्षिप्तं गुरु क्षितिम् ॥'
अथ जिनानां युक्तिभङ्गमाह।
'किं गण्यं तव वैगुण्यं द्वैगुण्यं यो वृथाकृथाः।
भार्केन्दूनां विलोक्याह्ना ध्रुवमत्स्यपरिभ्रमम् ॥'
भूगोलस्य समतां निराकर्त्तुमाह।
'यदि समा मुकुरोदरसन्निभा
भगवती धरणी तरणिः क्षितेः।
उपरि दूरगतोऽपि परिभ्रमन्
किमु नरैरमरैरिव नेक्ष्यते ॥
यदि निशाजनकः कनकाचलः
किमु तदन्तरगः स न दृश्यते।
उदगयं ननु मेरुरथांशुमान्
कथमुदेति स दक्षिणभागतः ॥'
अथ प्रत्यक्षविरोधशङ्कां निरस्यन्नाह।
'समो यतः स्यात् परिधेः शतांशः
पृथ्वी च पृथ्वी नितरां तनीयान्।
नरश्च तत्पृष्ठगतस्य कृत्स्ना
समेव तस्य प्रतिभात्यतः सा ॥'
स्वोक्तस्य भूपरिधिप्रमाणस्य उपपत्तिमाह।
'पुरान्तरं चेदिदमुत्तरं स्यात्
तदक्षविश्लेषलवैस्तदा किम्।
चक्रांशकैरित्यनुपातयुक्त्या
युक्तं निरुक्तं परिधेः प्रमाणम् ॥'
तदेव दृढीकुर्व्वन्नाह।
'निरक्षदेशात् क्षितिषोडशांशे
भवेदवन्ती गणितेन यस्मात्।
तदन्तरं षोड़शसंगुणं स्याद्
भमानमस्माद्बहु किं तदुक्तम् ॥
शृङ्गोन्नतिग्रहयुतिग्रहणोदयास्त-
च्छायादिकं परिधिना घटतेऽमुना हि।
नान्येन तेन जगुरुक्तमहीप्रमाण-
प्रामाण्यमन्वययुजा व्यतिरेककेण ॥'
अथ भूगोलपुरनिवेशमाह।
'लङ्का कुमध्ये यमकोटिरस्याः
प्राक्पश्चिमे रोमकपत्तनञ्च।
अधस्ततः सिद्धपुरं सुमेरुः
सौम्येऽथ याम्ये वड़वानलश्च ॥
कुवृत्तपादान्तरितानि तानि
स्थानानि षड्गोलविदो वदन्ति।
वसन्ति मेरौ सुरसिद्धसंघा
और्व्वे च सर्व्वे नरकाः सदैत्याः ॥
यो यत्र तिष्ठत्यवनीं तलस्था-
मात्मानमस्या उपरिस्थितञ्च।
स मन्यतेऽतः कुचतुर्थसंस्था
मिथश्च ते तिर्य्यगिवामनन्ति ॥
अधःशिरस्का कुदलान्तरस्था
श्छाया मनुष्या इव नीरतीरे।
अनाकुलास्तिर्य्यगधःस्थिताश्च
तिष्ठन्ति ते तत्र वयं यथात्र ॥'
अथ द्वीपानां समुद्राणाञ्च संस्थानमाह।
'भूमेरर्द्धं क्षारसिन्धोरुदक्स्थं
जम्बुद्वीपं प्राहुराचार्य्यवर्य्याः।
अर्द्धेऽन्यस्मिन् द्वीपषट्कस्य याम्ये
क्षारक्षीराद्यम्बुधीनां निवेशः ॥
लवणजलधिरादौ दुग्धसिन्धुश्च तस्मा-
दमृतममृतरश्मिः श्रीश्च यस्मादभूव।
महितचरणपद्मः पद्मजन्मादिदेवै-
र्वसति सकलवासो वासुदेवश्च यत्र ॥
दध्नो घृतस्येक्षुरसस्य तस्मा-
न्मद्यस्य च स्वादुजलस्य चाब्धिः।
स्वादूदकान्तर्वड़वानलोऽसौ
पातालसप्तानि पृथिवीपुटानि ॥
यत्रनृफणामणिगणांशुकृतप्रकाशा
एतेषु सासुरगणाः फणिनो वसन्ति।
दीव्यन्ति दिव्यरमणीरमणीयदेहैः
सिद्धाश्च तत्र हि लसत्कनकावभासैः ॥
शाकं ततः शाल्मलमत्र कौशं
क्रौञ्चञ्च गोमेदकपुष्करे च।
द्वयोर्द्वयोरन्तरमेकमेकं
समुद्रयोर्द्वीपमुदाहरन्ति ॥'